सर्व्वज्वरेषु सर्व्वरसमयत्वेन ।
"सूतं गन्धं विषञ्चैव टङ्कणञ्च मनःशिला ।
एतानि टङ्कमात्राणि मरिचं त्वष्टटङ्ककम् ॥
कटुत्रयं टङ्कषट्कं खल्ले क्षिप्त्वा विचूर्णयेत् ।
रसः श्वासकुठारोऽयं श्वाससर्व्वज्वरापहः ॥"
इति श्वासकुठारो रसः ॥ * ॥
श्वासे सर्व्वज्वरे रसरत्नाकरे ।
"दारुमत्तां शिखिग्रीवां रसकञ्च पृथक् पृथक् ।
टङ्कत्रयानुमानेन गृहीत्वा कनकद्रवैः ॥
मर्द्दयेत्त्रिदिनं कार्य्या वटी चणकमात्रया ।
मरिचैरेकविंशत्या सम्भिन्नतुलसीदलैः ॥
खादेद्वटीद्वयं पथ्यं दुग्धभक्तं सशर्करम् ।
तरुणं विषमं जीर्णं हन्यात् सर्व्वज्वरं ध्रुवम् ॥"
दारुमत्ता दारुमत्ती । शिखिग्रीवा तुतिया । रसकं खपरिया । प्रत्येकं टङ्क ३ धत्तूरपत्ररसेन मर्द्दयेत् । इति ज्वराङ्कुशः ॥ * ॥
सर्व्वज्वरेषु ।
"नागरं कर्षमात्रं स्यात् कर्षमात्रञ्च टङ्कणम् ।
मरिचं सार्द्धकर्षं स्यात् तावद्रक्तवराटकम् ॥
विषं कर्षचतुर्थांशं सर्व्वमेकत्र चूर्णयेत् ।
रसो हुताशनो नाम्ना खाद्यो गुञ्जामितो ज्वरे ॥"
इति हुताशनो रसो ज्वरे ॥ * ॥
"शुद्धजैपालटङ्कन्तु कट्वीटङ्कद्वयोन्मितम् ।
गैरिकं टङ्कमेकञ्च कन्यानीरेण मर्द्दयेत् ॥
कलायसदृशी कार्य्या वटिका तान्तु भक्षयेत् ।
शीतलेन जलेनैषा वटी जीर्णज्वरापहा ॥"
इति ज्वरघ्नीवटी ॥
"द्विभागतालेन हतञ्च ताम्रं
रसञ्च गन्धञ्च समांशमायुः ।
विषं समञ्च द्विगुणञ्च ताम्रं
त्रिसप्तरात्रेण दिवाकरांशैः ॥
विमर्द्दयेद्रिङ्गरसेन चूर्णं
गुञ्जैकदत्तं सितया समेतम् ।
ज्वराङ्कुशोऽयं रविसुन्दराख्यो
ज्वरानिहन्त्यष्टविधान् समस्तान् ॥"
अस्य प्रक्रिया । पारा टङ्क १ गन्धक टङ्क १ विषटङ्क १ द्विगुणतालकहतताम्रटङ्क २ रोहुमत्स्यकपित्त १ सब एकत्र खल्ले जवचूर्ण होइ मिलि तव नीविके पातकी खरसकभावना २१ घामे मह देवह मात्रा रत्ती एक अनुपान श्वेतशर्करा रत्ती २ खाइ । इति सर्व्वज्वरे रविसुन्दरो रसः ॥ * ॥
"शुद्धं सूतं तथा गन्धं खल्ले तावद्विमर्द्दयेत् ।
सूतं न दृश्यते यावत् किन्तु कज्जलवद्भवेत् ॥
एषा कज्जलिका ख्याता तुंहणी वीर्य्यवर्द्धिनी ।
नानानुपानयोगेन सर्व्वव्याधिविनाशिनी ॥" * ॥
कज्जलिकाविधानं तद्गुणाश्च रसरत्नप्रदीपे ।
"जयापत्ररसेनाथ शक्रभागरसेन च ।
भृङ्गराजरसेनापि काकमाच्या रसेन च ॥
रसं संशोध्य यत्नेन तत्समं शोधयेद्बलिम् ।
भृङ्गराजरसैः पिष्ट्वा शोषयेदर्करश्मिभिः ॥
सप्तधा वा त्रिधा वापि मत्वाह्नूर्येणु कारयेत् ।
चूर्णयित्वा समं तेन रसेन सह मर्द्दयेत् ॥
मर्द्दहतं यदा चूर्णं भवेत् कज्जलसन्निभम् ।
निर्धूमे वदराङ्गारे द्रवीकुर्य्यात् प्रयत्नतः ॥
तत्र तं महिषीविष्ठास्थापिते कदलीतले ।
निःक्षिप्य तदुपर्य्यन्यत् पत्रं दत्त्वा प्रपीडयेत् ॥
शीतलान्तात् ततः पत्रात् समुद्धृत्य विचूर्णयेत् ।
एवं सिद्धा भवेद्व्याधिघातिनी रसपर्पटी ॥
ज्वरादिव्याधिभिर्व्याप्तं विश्वं दृष्ट्वा पुरा हरः ।
चकार कृपया युक्तः सुधावद्रसपर्पटीम् ॥
रक्तिकासंमितां तावद्भृष्टजीरकसंयुताम् ।
गुञ्जार्द्धभृष्टहिङ्ग्वाढ्यां भक्षयेद्रसपर्पटीम् ॥
रोगानुरूपभैषज्यै रपि तां भक्षयेद्बुधः ।
पिबेत्तदनुपानीयं शीतलं चुलुकत्रयम् ॥
प्रत्यहं वर्द्धयेत्तस्या एकैकां रक्तिकां भिषक् ।
नाधिकां दशगुञ्जातो भक्षयेत्तां कदाचन ॥
एकादशदिनारम्भात् तां तथैवापकर्षयेत् ।
एवमेताः समश्नीयान्नरो विंशतिवासरान् ॥
शिवं गुरुं तथा विप्रान् पूजयित्वा प्रणम्य च ।
श्रद्धया भक्षयेदेतां क्षीरमांसरसाशनः ॥
ज्वरञ्च ग्रहणीञ्चापि तथातीसारमेव च ।
कामलां पाण्डुरोगञ्च शूलप्लीहजलोदरम् ॥
एवमादीन् गदान् हत्वा हृष्टः पुष्टश्च वीर्य्यवान् ।
जीवेद्वर्षशतं साग्रं वलीपलितवर्ज्जितः ॥"
इति रसपर्पटी ॥ * ॥
अथ ज्वरिणो अन्नदानसमयः । तत्र चरकः ।
"क्षुत् सम्भवति पक्वेषु रसदोषमलेषु च ।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः ॥"
अन्यच्च ।
"आमे पाकं गते नृणां यदा भोजनलालसा ।
भवेत् काले ह्यकाले वा सोऽन्नकाल उदाहृतः ॥"
तत्र कालमाह । ज्वरस्य पाकावस्थान्नदानकालः ज्वरस्य पाककालश्च ।
"वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः ।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि ॥"
ज्वरस्य पाक उपशमः ॥ ज्वरपाकेनैव रसपाके दोषपाकोऽपि कथितः । यतो दोषपाकं विना ज्वरपाको न भवति रसपाकं विना दोषपाकश्च न भवति ॥ * ॥ ननु यथा पैत्तिको ज्वरो दशाहोरात्रेण पाकं याति । एकादशे दिनेऽन्नं दीयते । तथा श्लैष्मिको ज्वरो द्वादशाहोरात्रेण पाकं याति त्रयोदशदिवसेऽन्नं दीयते । तथा वातिको ज्वरः सप्ताहोरात्रेण पाकं याति । अष्टमे दिवसेऽन्नं कथं न दीयते । कथं सप्तम एव दिवसेऽन्नं दीयते । इति । उच्यते ।
"कफपित्ते द्रवे धातू सहेते लङ्घनं बहु ।
आमक्षयादूर्द्धमपि वायुर्न सहते क्षणम् ॥"
इति वचनादामरसपाके जाते आहारलाभं विना वायुः क्षणमात्रमपि सोढुं न शक्नोति । स आशुकारित्वाम् क्षयादाक्षेपकादीन् विकारान् संजनयति ॥ अतो वातिके ज्वरे पाकदिनानामन्तिमे सप्तम एव दिनेऽन्नं दीयते । तथा च धन्वन्तरिः ।
"ज्वराभिभूतः षड्हे व्यतीते
विपक्वदोषः क्षतलङ्घनादिः ।
यो भेषजं खादति वैद्यवश्यो
निःसंशयं हन्त्यचिरात् स रोगान् ॥"
ज्वराभिभूतः वातज्वराभिभूतः । विपक्वदोषः पक्ववातः । क्षतलङ्घनादिः आदिशब्दात् क्षतपक्वजलपाननिर्व्वातगृहवासगुरुप्रावसनधारणादिः । भेषजमित्यन्नस्याप्युपलक्षणम् । अतएव चरकः ।
"ज्वरितं षड्हेऽतीते लघ्वन्नं प्रतिभोजितम् ।
पाचनं शमनीयं वा कषायं पाययेत्तु तमिति ॥"
ज्वरितं वातज्वरिणम् ॥ षड्हेऽतीते इत्युपलक्षणम् ॥ पित्तज्वरिणं दशाहेऽतीते ॥ श्लेष्मज्वरिणं द्वादशाहेऽतीते ॥ लघ्वन्नं भोजितं ज्वरिणं पाचनं शमनीयं वा कषायं पाययेत् । पुनः स एव ।
"सर्व्वज्वरेषु ज्वरितं दिनान्ते भोजयेल्लघु ॥"
दिनान्तेऽन्तशब्दोऽत्र मध्यवाची तेन त्रिधा विभक्तस्य दिवसस्य मध्यभागे पित्तप्राधान्यसमये ॥ उक्तञ्च वाग्भटेन ।
"वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमादिति ।"
ते वातपित्तश्लेष्माणः ॥ पित्तकालेऽपि मध्याह्नादर्व्वाक् । यत आह ।
"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ॥" इति ॥
एतत् सुस्थपरमिति चैतन्न । यत आह ।
"श्लेष्मक्षये प्रवृद्धोष्मा बलवाननलस्तदा ।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥"
तदा पित्तप्राधान्यसमये । अन्यथा उक्तसमयादन्यदा । वेगापाये जठराग्निवेगनाशे । तत् भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः ॥ * ॥ अत्र विषमज्वरिणोऽन्नं दातुं कालविशेषमाह चरकः ।
"सर्व्वज्वरेषु सप्ताहं मात्रावल्लघु भोजयेत् ।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥"
सर्व्वज्वरेषु सर्व्वविषमज्वरेषु । वेगापाये ज्वरवेगापाये भोजयेत् । अन्यथा ज्वरवेगापायं विना । तत् भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः ॥ * ॥ अथान्नग्रहणाय स्नानमाह ।
"आहारनिर्हारविहारयोगाः
सदैव सद्भिर्विजने विधेयाः ॥" इति ॥ * ॥
अल्पबलस्य ज्वरितस्य भोजनार्थोपवेशनप्रकारमाह सुश्रुतः ।
"ज्वरे प्रमेहो भवति खल्वपि विचेष्टितैः ।
नियतं भोजयेत्तस्माच्छूचीचारौ च कारयेत् ॥"
नियतं यथास्थानस्थितमेव न तु स्थानान्तरं नीत्वा ॥ * ॥ अन्नग्रहणसमये प्रथमं ज्वरितेन कवलः कर्त्तव्य इत्याह ।
"यथा दोषोचितैर्द्रव्यैः कर्त्तव्यः कवलग्रहः ।
अरोचकास्यवैरस्यमलपूतिप्रसेकहृत् ॥
भृष्टजीरकचूर्णेन सिन्धुत्थमयतेन च ।
जिह्वां दन्तान् मुखस्थान्तघृष्ट्वा कवलमाचरेत् ॥